**SET – 4**

**Series : BVM/1**

कोड नं.
**Code No. 49**

रोल नं.
**Roll No.**

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **15** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019

# संस्कृतम् (ऐच्छिकम्)
# SANSKRIT (Elective)

*समय : होरात्रयम्* | *पूर्णाङ्काः : **100***
*निर्धारित समय : 3 घंटे* | *अधिकतम अंक : **100***
*Time allowed : **3** hours* | *Maximum Marks : **100***

| | |
|---|---|
| **निर्देशा: :** | *संकेताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।* |
| **निर्देश :** | *जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।* |
| **Instructions :** | *Answer all questions in Sanskrit, unless instructions are given otherwise.* |

*अस्मिन् प्रश्नपत्रे* ***चत्वारः*** *खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में* ***चार*** *खण्ड हैं ।*

*There are* ***four*** *sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्डः क | : | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | **15 अङ्काः** |
| Section A | : | (Unseen Reading Comprehension) | |
| खण्डः ख | : | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | **15 अङ्काः** |
| Section B | : | (Writing Skills in Sanskrit) | |
| खण्डः ग | : | पठितांश – अवबोधनं संस्कृतसाहित्यस्य परिचयः च (पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय) | **40 + 10 = 50 अङ्काः** |
| Section C | : | (Reading Comprehension & Introduction to History of Sanskrit Literature) | |
| खण्डः घ | : | छन्दोऽलङ्काराः (छन्द एवम् अलङ्कार) | **20 अङ्काः** |
| Section D | : | (Metres and Figures of Speech) | |

## खण्डः क (Section A) 15 अङ्काः

### अपठितांश – अवबोधनम्

### अपठितांश – अवबोधन

### Unseen Reading Comprehension

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत । **5 अङ्काः**

अधोलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following passage and answer the given questions in Sanskrit :

अस्माकं जीवने अनेके जनाः सहचारिणः भवन्ति यथा मित्राणि, बान्धवाः आदयः । परं विपत्तिकाले एव एतेषां मूल्यांकनम् भवति । आचार्येण चाणक्येन उक्तम् – यः जनः रोगसमये भवतः पार्श्वे तिष्ठति स एव यथार्थः सहचरः भवति । यदा जीवने कोऽपि भयंकरं कष्टं प्राप्नोति, तस्मिन् समये च यः जनः साहाय्यं करोति सः निश्चयेन सत्यः सखा भवति । एतादृशैः जनैः सह कदापि मित्रता न त्यजनीया । यथार्थमित्राणि तु सदैव सम्माननीयाः ।

प्रश्नाः

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्) **½ × 2 = 1**

एक शब्द में उत्तर दीजिए । (कोई **दो** प्रश्न)

Answer in one word. (Any **two**)

(i) मित्राणां मूल्यांकनम् कदा भवति ?

(ii) के सम्माननीयाः भवन्ति ?

(iii) यथार्थमित्रैः सह का न त्यजनीया ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) **1 × 2 = 2**

पूर्ण वाक्य में उत्तर दीजिए । (कोई **दो** प्रश्न)

Answer in a complete sentence. (Any **two**)

(i) कः यथार्थः सहचरः भवति ?

(ii) कः सत्यः सखा भवति ?

(iii) कस्य जीवने अनेके सहचारिणः भवन्ति ?

(स) यथानिर्देशम् उत्तरत । (केवलं प्रश्न**द्वयम्**) **1 × 2 = 2**

यथानिर्देश उत्तर दीजिए । (कोई **दो** प्रश्न)

Answer as directed. (Any **two**)

(i) 'भवन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'सखा' इति पदस्य किं समानार्थकम् अत्र प्रयुक्तम् ?

(iii) 'कष्टम्' इति विशेष्यस्य विशेषणं किम् ?

2. निम्नलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । **10 अङ्काः**

निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।

Read the following passage and answer the given questions in Sanskrit.

अस्माकं देशः भारतम्; वयं भारतवासिनः स्मः । भारतस्य प्राचीनं नाम आर्यावर्त आसीत् । उत्तरदिशायां हिमालयात् दक्षिणे कन्याकुमारीपर्यन्तं, पूर्वदिशायां अरुणाचलप्रदेशात् पश्चिमे गुजरातप्रदेशपर्यन्तम् एतस्य विस्तारः वर्तते । भारतं विविधतायाम् एकतायाः सर्वोत्तमम् उदाहरणम् अस्ति । अस्माकं देशे हिन्दू–इसाई–मुस्लिम–सिख–आदयः विविधधर्मावलम्बिनः जनाः परस्परं मैत्रीभावेन मिलित्वा वसन्ति । भारतीयाः उत्सवप्रियाः भवन्ति । एते सर्वेषां धर्माणाम् उत्सवान् सोत्साहं मिलित्वा मानयन्ति । भारतीयाः तु सम्पूर्णं विश्वं परिवाररूपे पश्यन्ति । उक्तमपि–उदारचरितानां तु वसुधैव कुटुम्बकम् ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्न**द्वयम्**) **1 × 2 = 2**

एक शब्द में उत्तर दीजिए । (कोई **दो** प्रश्न)

Answer in one word. (Any **two**)

(i) भारतस्य प्राचीनं नाम किम् आसीत् ?

(ii) के उत्सवप्रियाः भवन्ति ?

(iii) उत्तरदिशायां किम् अस्ति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्न**द्वयम्**) **2 × 2 = 4**

पूर्ण वाक्य में उत्तर दीजिए । (कोई **दो** प्रश्न)

Answer in a complete sentence. (Any **two**)

(i) अस्माकं देशे के परस्परं मिलित्वा वसन्ति ?

(ii) भारतं कस्याः सर्वोत्तमम् उदाहरणम् अस्ति ?

(iii) भारतस्य विस्तारः कीदृशः वर्तते ?

(स) यथानिर्देशम् उत्तरत । (केवलं प्रश्नद्वयम्) $1 \times 2 = 2$

यथानिर्देश उत्तर दीजिए । (कोई **दो** प्रश्न)

Answer as directed. (Any **two**)

(i) 'वसन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'शत्रुता' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(iii) 'एते' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

(द) अनुच्छेदस्यास्य समुचितं शीर्षकं संस्कृतेन लिखत । $2 \times 1 = 2$

इस अनुच्छेद के लिये उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write a suitable title for this passage in Sanskrit.

## खण्डः ख (Section B) 15 अङ्काः

### रचनात्मक–कार्यम्

### रचनात्मक–कार्य

### Writing Skill

3. अधोलिखितानि वाक्यानि कथोचितक्रमेण पुनः विन्यसत । $1 \times 5 = 5$

निम्नलिखित वाक्यों को कथाक्रम के अनुसार पुनः लिखिए ।

Rewrite the following sentences according to the story.

(i) तस्य विवाहः विदुष्या विद्योत्तमया सह अभवत् ।

(ii) देव्याः काल्याः कृपया कालिदासः विद्वान् अभवत् ।

(iii) आरम्भे कालिदासः मूर्खः आसीत् ।

(iv) तं मूर्खं ज्ञात्वा सा कालिदासं गृहात् निष्कासितवती ।

(v) सः विश्वप्रसिद्धानि काव्यानि रचयित्वा विश्वे विख्यातः अभवत् ।

4. मञ्जूषायां प्रदत्तपदानां सहायतया स्वयं वा **पञ्चभिः** संस्कृतवाक्यैः कमपि एकम् अधोलिखितं विषयम् अधिकृत्य वर्णनं कुरुत । **1 × 5 = 5**

मञ्जूषा में दिए गए पदों की सहायता से या स्वयं निम्नलिखित किसी एक विषय को लेकर **पाँच** संस्कृत वाक्यों में वर्णन कीजिए ।

Write **five** sentences in Sanskrit with the help of the words given in the box or yourself on any one topic given below.

**विषय : परोपकारः**

**मञ्जूषा**

| |
|---|
| परस्य, भवति, मन्दः, पुण्यम्, स्वार्थम्, वर्तते, जनाः, मूर्खः, मिलति, महात्मा गाँधी, सन्ति, फलम्, लोके, अपि, परेषाम्, शरीरेण, धनादिना । |

**अथवा**

**विषय : भारतीय–सैनिकाः**

**मञ्जूषा**

| |
|---|
| सीमायाः, भवन्ति, उत्तरे, भारतीयाः, हिमालयः, संसारे, वीराः, रक्षन्ति, पराजितः, प्रसिद्धाः, भवति, पाकिस्तानदेशम्, अहर्निशम्, पर्वतेषु, कष्टमयम्, हिमकाले, सावधानाः । |

5. निम्नलिखितवाक्यानां संस्कृतेन अनुवादं कुरुत । **1 × 5 = 5**

निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए ।

Translate following sentences into Sanskrit.

(i) मनोज पिता को पत्र लिखता है ।

(ii) हम दोनों भोजन के लिए घर जाते हैं ।

(iii) वह श्याम का मित्र है ।

(iv) छात्र संस्कृत पढ़ते हैं ।

(v) साधु तपस्या के लिए वन गया ।

(i) Manoj writes a letter to the father.

(ii) We both go home for the food.

(iii) He is a friend of Shyam.

(iv) Students read Sanskrit.

(v) Saint went to the forest for meditation.

## खण्डः ग (Section C) 40 + 10 = 50 अङ्काः

### पठितांश–अवबोधनम् संस्कृतसाहित्यस्य परिचयः च

### पठितांश–अवबोधन एवं संस्कृत साहित्य का परिचय

### Reading Comprehension & Introduction to History of Sanskrit Literature

6. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत । **5 अङ्काः**

निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following prose passage and answer the given questions in Sanskrit :

भवादृशा एव भवन्ति भाजनान्युपदेशानाम् । अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः । हरति अतिमलिनमपि दोषजातं गुरूपदेशः । गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम् । विशेषेण तु राज्ञाम् । विरला हि तेषामुपदेष्टारः । राजवचनमनुगच्छति जनो भयात् । उपदिश्यमानमपि ते न शृण्वन्ति । अवधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून् ।

**प्रश्ना :**

(अ) एकपदेन उत्तरत । (केवलं **प्रश्नद्वयम्**) **½ × 2 = 1**

एक शब्द में उत्तर दीजिए । (कोई **दो** प्रश्न)

Answer in one word. (Any **two**)

(i) के उपदेशानां भाजनानि भवन्ति ?

(ii) जनः कस्मात् कारणात् राजवचनमनुगच्छति ?

(iii) के विरलाः सन्ति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं **प्रश्नमेकम्**) **2 × 1 = 2**

पूर्ण वाक्य में उत्तर दीजिए । (कोई **एक** प्रश्न)

Answer in a complete sentence. (Any **one**)

(i) गुरूपदेशः कीदृशं स्नानं भवति ?

(ii) गुरूपदेशः किं हरति ?

(स) यथानिर्देशम् उत्तरत । (केवलं **प्रश्नद्वयम्**) **1 × 2 = 2**

यथानिर्देश उत्तर दीजिए । (कोई **दो** प्रश्न)

Answer as directed. (Any **two**)

(i) 'हरति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'नृपाणाम्' इति पदस्य किं समानार्थकम् अत्र प्रयुक्तम् ?

(iii) 'हितोपदेशदायिनो' इति विशेषणस्य विशेष्यं किम् ?

7. अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत । **5 अङ्काः**

निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following poetry and answer the given questions in Sanskrit :

पापान्निवारयति योजयते हिताय, गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले, सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्न**द्वयम्**) **½ × 2 = 1**

एक शब्द में उत्तर दीजिए । (कोई **दो** प्रश्न)

Answer in one word. (Any **two**)

(i) हिताय कः योजयते ?

(ii) सुहृत् कान् प्रकटीकरोति ?

(iii) सन्मित्रं कस्मात् निवारयति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमे**कम्**) **2 × 1 = 2**

पूर्ण वाक्य में उत्तर दीजिए । (कोई **एक** प्रश्न)

Answer in a complete sentence. (Any **one**)

(i) सन्मित्रस्य लक्षणं किम् ?

(ii) सन्मित्रं कं न जहाति ?

(स) यथानिर्देशम् उत्तरत । (केवलं प्रश्न**द्वयम्**) **1 × 2 = 2**

यथानिर्देश उत्तर दीजिए । (कोई **दो** प्रश्न)

Answer as directed. (Any **two**)

(i) 'सन्तः' अस्य क्रियापदं किम् ?

(ii) 'विपत्तिः' इति पदस्य किं पदं समानार्थकम् अत्र प्रयुक्तम् ?

(iii) 'दोषान्' इति पदस्य किं विलोमपदमत्र प्रयुक्तम् ?

8. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत । **5 अङ्काः**

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following Drama passage and answer the given questions in Sanskrit :

अरुन्धती : एहि वत्स ! (लवमुत्संगे गृहीत्वा आत्मगतम्) दिष्ट्या न केवलमुत्संगश्चिरान्मनोरथोऽपि मे पूरितः ।

कौसल्या : जात ! इतोऽपि तावदेहि । (उत्संगे गृहीत्वा) अहो, न केवलं मांसलोज्ज्वलेन देहबन्धेन, कलहंसघोष-घर्घरानुनादिना स्वरेण च रामभद्रमनुसरति । जात ! पश्यामि ते मुखपुण्डरीकम् । (चिबुकमुन्नमय्य, निरूप्य, सवाष्पाकूतम्) राजर्षे ! किं न पश्यसि ? निपुणं निरूप्यमाणो वत्साया मे वध्वा मुखचन्द्रेणापि संवदत्येव ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्न**द्वयम्**) **½ × 2 = 1**

एक शब्द में उत्तर दीजिए । (कोई **दो** प्रश्न)

Answer in one word. (Any **two**)

(i) 'एहि वत्स' इति उक्त्वा का आह्वयति ?

(ii) अरुन्धत्याः चिरात् कः पूरितः ?

(iii) का लवस्य मुखपुण्डरीकं पश्यति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमे**कम्**) **2 × 1 = 2**

पूर्ण वाक्य में उत्तर दीजिए । (कोई **एक** प्रश्न)

Answer in a complete sentence. (Any **one**)

(i) लवः कथं रामभद्रमनुसरति ?

(ii) अरुन्धत्याः मनोरथः कथं पूरितः ?

(स) यथानिर्देशम् उत्तरत । (केवलं प्रश्न**द्वयम्**) **1 × 2 = 2**

यथानिर्देश उत्तर दीजिए । (कोई **दो** प्रश्न)

Answer as directed. (Any **two**)

(i) 'पश्यामि' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'ते' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

(iii) 'कमलम्' इति पदस्य किं समानार्थकम् अत्र प्रयुक्तम् ?

9. पदानां समुचितार्थैः मेलनं कृत्वा पुनः लिखत – (केषाञ्चित् **चतुर्णाम्**) **½ × 4 = 2**

शब्दों का समुचित अर्थों से मिलान करके लिखिए। (कोई **चार**)

Match the words with their meanings and rewrite the same. (Any **four**)

| | |
|---|---|
| (अ) पयोदः | (i) वनम् |
| (आ) अनार्या | (ii) मेघः |
| (इ) अरण्यम् | (iii) वृक्षाः |
| (ई) विटपाः | (iv) दुष्टा |
| (उ) अपरः | (v) कृष्णः |
| (ऊ) श्यामः | (vi) अन्यः |

10. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केषुचित् **चतुर्षु**) **1 × 4 = 4**

निम्नलिखित वाक्यों में रेखाङ्कित पदों के आधार पर प्रश्न–निर्माण कीजिए। (कोई **चार**)

Frame questions on the basis of the underlined words in the following sentences. (Any **four**)

(i) वृक्षाः 'लेखनी' इति भवेयुः।

(ii) तस्येप्सितं देवः सम्पादयति।

(iii) धनेन सर्वमपि लभ्यते।

(iv) तस्याः दार्शनिकैः सप्तधा विभागः कृतः।

(v) वर्तमानकाले समाजस्य भीषणपरिस्थितिः अस्ति।

(vi) रत्नानि गृहीत्वा राज्ञो हस्ते प्रयच्छ।

11. अधोलिखितभावार्थेषु रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत। (कयोश्चिद् **द्वयोः**) **3 × 2 = 6**

निम्नलिखित भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति कीजिए। (कोई **दो**)

Fill in the blanks in the following explanations with the help of the words given in the box. (Any **two**)

(अ) "अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः ।।"

**भावार्थः**

ये नराः ज्ञानाभावे ___(i)___ यज्ञादि कर्माणि कुर्वन्ति, ते ___(ii)___ प्रविश्य इतस्ततः भ्रमन्ति। ये जनाः केवलं विद्याम् उपासन्ते। ते अपि ___(iii)___ शुद्धेरभावात् ततोऽपि गहनतमे अन्धकारे प्रविशन्ति।

(आ) योऽयमश्वः पताकेयमथवा वीरघोषणा ।

सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ।।

**भावार्थः**

योऽयम् अश्वः अस्ति, इयं (i)______ अस्ति अथवा वीरघोषणा अस्ति । सर्वं (ii)______ शत्रोः सप्तसु लोकेषु एकवीरस्य (iii)______ अस्ति ।

(इ) नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।

शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।। 2 ।।

श्रीकृष्णः अर्जुनमुपदिशति – मनुष्यैः नित्यं कर्माणि (i)______ । यः जनः कर्म न करोति सः निम्नः भवति । अकर्मणः जनस्य (ii)______ व्यवहारमपि न सिद्ध्यति । अतः त्वं नित्यं कर्म (iii)______ ।

**मञ्जूषा**

| |
|---|
| कर्मफलभावनया, ध्वजा, कुरु, श्रीरामचन्द्रस्य, लौकिकम्, रावणवंशस्य, करणीयानि, अन्तःकरणस्य, अज्ञानान्धकारे |

12. अधोलिखित-अन्वये रिक्तस्थानानि पूरयत । (केवलं पद्यमे**कम्**) **1 × 3 = 3**

निम्नलिखित श्लोकों के अन्वय में रिक्त स्थानों की पूर्ति कीजिए । (कोई **एक**)

Fill in the blanks in the following prose-order-renderings of the Verse. (Any **one**)

(अ) प्रातः प्रयाणाभिमुखाय तस्मै

सविस्मयाः कोषगृहे नियुक्ताः ।

हिरण्मयीं कोषगृहस्य मध्ये

वृष्टिं शशंसुः पतितां नभस्तः ।।

**अन्वयः**

प्रातः तस्मै प्रयाणाभिमुखाय (i)______ नियुक्ताः सविस्मयाः (ii)______ मध्ये नभस्तः पतिताम् (iii)______ वृष्टिम् शशंसुः ।

(आ) शरीरमात्रेण नरेन्द्र तिष्ठन्

आभासि तीर्थप्रतिपादितर्द्धिः ।

आरण्यकोपात्तफलप्रसूतिः

स्तम्बेन नीवार इवावशिष्टः ।।

**अन्वयः**

(i)______ ! आरण्यकोपात्तफलप्रसूतिः स्तम्बेन (ii)______ नीवार इव तीर्थप्रतिपादितर्द्धिः (iii)______ तिष्ठन् आभासि ।

13. यथानिर्देशम् उत्तरत । **10 अङ्काः**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत – (केवलं **द्वयम्**) **1 × 2 = 2**

कर्ता एवं क्रियापद चुनिए – (कोई **दो**)

Select the subject and the verb. (Any **two**)

(i) अहं देशसेवां कर्तुं गृहाद् बहिरभवम् ।

(ii) क्रूरः 'किन्तुः' मुखस्य कवलमप्याच्छिनत्ति ।

(iii) राजावभृथस्नानं कृत्वा सर्वानर्थिजनान् परिपूर्णमनोरथानकरोत् ।

(आ) विशेषणं विशेष्यं च चिनुत – (केवलं **द्वयम्**) **1 × 2 = 2**

विशेषण और विशेष्य पद चुनिए – (कोई **दो**)

Select the adjective and special word. (Any **two**)

(i) लोभाक्रान्त–हृदयाः मनुजन्मानः प्रतिक्षणं स्वार्थसाधनाय सर्वात्मना प्रवर्तन्ते ।

(ii) तावदकस्मात् उत्थितो महान् झञ्झावातः ।

(iii) कुत्सितः पुत्रः संकटे कदाचिदुपयुक्तो भवेत् ।

(इ) अधोलिखितवाक्येषु रेखांकितसर्वनामपदानि केभ्यः प्रयुक्तानि ? (केवलं **द्वयम्**) **1 × 2 = 2**

निम्नलिखित वाक्यों में रेखांकित सर्वनाम पद किनके लिए प्रयुक्त हुए हैं ? (कोई **दो**)

In the following lines for whom are the underlined pronouns used ? (Any **two**)

(i) प्रथमं त्वया निर्मितो अनाथाश्रमो अधुना महाद्रुमेण परिणतः ।

(ii) सोऽपि समुद्रतीरं गत्वा गन्धपुष्पादिषोडशोपचारं विधायाब्रवीत् ।

(iii) अनया कथमपि दैववशेन परिगृहीताः विक्लवाः भवन्ति राजानः ।

(ई) कः कं कथयति ? (केवलं **द्वयम्**) **1 × 2 = 2**

कौन किसको कह रहा है ? (कोई **दो**)

Who is saying this to whom ? (Any **two**)

(i) अहमधुना द्वित्राणां दिवसानां सकारणावकाशं स्वीकरिष्यामि ।

(ii) विक्रमार्को राजा यज्ञं करोति । तेन प्रेषितोऽहं त्वामाह्वातुं समागतः ।

(iii) अधुनात्र शताधिका अनाथशिशवो लालिताः पालिताश्च भवन्ति ।

(उ) समानार्थकं पदं चिनुत । (केवलं **द्वयम्**) 1 × 2 = 2

समानार्थक पद चुनिए । (कोई **दो**)

Select the synonyms of the given words. (Any **two**)

(i) अग्नौ

प्रशान्तजठरानले सकृदुपजातायां स्वोदरपूर्तौ नहि ते करतलगतानपि हरिणशशकादीन् उपघ्नन्ति ।

(ii) तटम्

सोऽपि समुद्रतीरं गत्वा गन्धपुष्पादिषोडशोपचारं विधायाब्रवीत् ।

(iii) आकाशम्

महान्धकारा च समस्तं गगनतलं पर्यच्छदीत् ।

14. (अ) अधोलिखितलेखकानां कस्यापि **एकस्य** काव्यस्य नाम लिखत । 1 × 5 = 5

निम्नलिखित लेखकों के किसी **एक** काव्य का नाम लिखिए ।

Write the name of any **one** work of each of the following poets :

बाणभट्टः, भर्तृहरिः, अम्बिकादत्तव्यासः, पं. हृषीकेशभट्टाचार्यः, पण्डितराज जगन्नाथः

(ब) अधोलिखितरचनानां लेखकानां नामानि लिखत । (केवलं **पञ्चानाम्**) 1 × 5 = 5

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए । (कोई **पाँच**)

Write the names of the authors of the following works : (Any **five**)

रघुवंशम्, पाषाणी कन्या, समुद्र-संगमः, प्रबन्ध-पारिजातः, महाभारतम्, शिशुपालवधम्, उत्तररामचरितम्

## खण्डः घ (Section D) 20 अङ्काः

### छन्दोऽलङ्कारपरिचयः

### छन्द एवम् अलङ्कार परिचय

### Metres and Figures of Speech

15. (अ) प्रश्नान् उत्तरत । (केवलं **द्वयम्**) 1 × 2 = 2

प्रश्नों के उत्तर दीजिए । (कोई **दो**)

Answer the questions. (Any **two**)

(i) 'विक्रमः' अत्र 'मः' इति लघुः गुरुः वा ?

(ii) जगणस्य स्वरूपं लिखत ।

(iii) 'लोचने' इत्यत्र को गणः ?

(ब) अधोलिखितपरिभाषाः पूरयत । (केवलं **चतस्रः**) $1 \times 4 = 4$

निम्नलिखित परिभाषाओं को पूरा कीजिए । (कोई **चार**)

Complete the following definitions. (Any **four**)

(i) सूर्याश्वैर्यदि ________ शार्दूलविक्रीडितम् ।

(ii) ________ वंशस्थमुदीरितं जरौ ।

(iii) श्लोके ________ सर्वत्र लघु पञ्चमम् ।

(iv) ननमयययुतेयं ________ ।

(v) स्यादिन्द्रवज्रा यदि ________ ।

(स) अधोलिखितपंक्तिषु किं किं छन्दः ? (केवलं **द्वयम्**) $1 \times 2 = 2$

निम्नलिखित पंक्तियों में कौन-कौन सा छन्द है ? (कोई **दो**)

What is the metre in the following lines ? (Any **two**)

(i) शूरं कृतज्ञं दृढनिश्चयं च ।

(ii) न किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।

(iii) मनसि वचसि काये पुण्यपीयूषपूर्णाः ।

(द) **एकस्य** छन्दसः उदाहरणं लिखत । 2

**एक** छन्द का उदाहरण लिखिए ।

Write an example of any **one** of the metres :

(i) उपजातिः (ii) मन्दाक्रान्ता ।

16. (अ) कस्यचि**देकस्य** शब्दालङ्कारस्य सोदाहरणं लक्षणं लिखत । 3

किसी **एक** शब्दालङ्कार का सोदाहरण लक्षण लिखिए ।

Write the definition and example of any **one** of the figures of speech :

(i) यमकम् (ii) श्लेषः

(ब) कस्यचि**देकस्य** अर्थालङ्कारस्य लक्षणमुदाहरणं च लिखत । 3

किसी **एक** अर्थालङ्कार का लक्षण एवं उदाहरण लिखिए ।

Define and illustrate any **one** of the figures of speech :

(i) उपमा (ii) अर्थान्तरन्यासः ।

(स) अधोलिखितपंक्तिषु के अलङ्काराः । (केवलं **द्वयम्**) $1 \times 2 = 2$

निम्नलिखित पंक्तियों में कौन से अलङ्कार हैं । (कोई **दो**)

Indicate the figure of speech in the following lines. (Any **two**)

(i) सत्त्वानां क्रन्दनस्य च भयानकेन स्वनेन कवलीकृतमिव गगनतलम् ।

(ii) इह पर्वत-श्रेणीतः पर्वतश्रेणीः, वनाद् वनानि ।

(iii) किन्तुकुठारस्य कठोरतया नितान्तमेव तान्तोऽस्मि ।

(द) अधोलिखितपरिभाषाः पूरयत । (केवलं **द्वयम्**) $1 \times 2 = 2$

निम्नलिखित परिभाषाओं को पूर्ण कीजिए । (कोई **दो**)

Complete the following definitions of the figures of speech. (Any **two**)

(i) तद्रूपकमभेदो य ________ ।

(ii) ________ अनुप्रासः ।

(iii) भवेत् संभावनोत्प्रेक्षा ________ ।

________________